# শ্রী শ্রী ওঙ্কারনাথবৈদিকবিদ্যাপীঠম্

১৪৩১ বঙ্গাব্দস্য বার্ষিকসংস্কৃতপরীক্ষা

বিষয়ঃ–ধর্মশাস্ত্রম্ তৃতীয়পত্রম্ পূর্ণাঙ্কঃ - ১০০

**ক) অত্র দ্বাবিংশতিঃ প্রশ্নাঃ সন্তি। দ্বিত্রৈঃ বাক্যৈঃ এষু বিংশতিঃ প্রশ্নাঃ সমাধেয়াঃ।** **২০×২ = ৪০**

১) কিমর্থং নির্মিতঃ নৃপঃ?

২) দন্ড- বিধানস্য ক্রমঃ নির্ণয়।

৩) পিতা রক্ষতি কৌমারে ভর্ত্তা রক্ষতি যৌবনে।
রক্ষন্তি স্থবিরে পুত্রা ন স্ত্রী স্বাতন্ত্রমর্হতি।।- কঃ অর্থঃ?

৪) ব্রাহ্মণানাং ষড়বিধ-কর্মানি কানি?

৫) প্রাজাপত্যং কিম্?

৬) পিতৃদেব মনুষ্যানাং বেদচক্ষুঃ সনাতনম্।
অশক্যঞ্চাপ্রমেয়ঞ্চ বেদশাস্ত্রমিতি স্থিতিঃ।।-বঙ্গানুবাদঃ করণীয়ঃ।

৭) উদ্বাহঃইতি শব্দস্য-বুৎপত্তিঃ, সমার্থকঃ শব্দদ্বয়ঞ্চ লিখতু।

৮) সাপিণ্ড্যং সপ্তপুরুষাঃ কে?

৯) পিতুঃ পিতুঃ স্বসুঃ পুত্রাঃ পিতুর্মাতুঃ স্বসুঃ সুতাঃ।
পিতুর্মাতুলপুত্রাশ্চ বিজ্ঞেয়াঃ পিতৃবান্ধবাঃ।।-কঃ অর্থঃ?

১০) "মাতৃবান্ধবাঃ"- কে?

১১) কিমর্থং দিবাবিবাহঃ নিষেধঃ?

১২) "ঋতুকালাভিগামী স্যাৎ যাবৎ পুত্রো ন জায়তে।"-কঃ অর্থঃ?

১৩) দাসঃ, ভুতির্দত্তঃ, ত্রাতৃবর্মা, দেবশর্মা- কেষাং উপপদত্বম্?

১৪) সংজ্ঞাং লিখ- ১) গৌণচন্দ্রঃ, ২) মুখ্যচন্দ্রঃ।

১৫) ব্রাহ্মা-দীনাহ যাজ্ঞবল্ক্যঃ-"ব্রাহ্মোবিবাহ আহূয় দীয়তে শক্ত্যলঙ্কৃতা।
তজ্জঃ পুনাত্যুভয়তঃ পুরুষানেকবিংশতিম্।।- কঃ অর্থঃ?

১৬) বিবাহপ্রশস্তকালঃ কঃ?

১৭) পরিবেদন-দোষঃ কঃ?

১৮) মীমাংসাপরিভাষাতঃ সোদাহরণং ধর্মলক্ষণং লিখ।

১৯) পূর্বমীমাংসায়াং অধর্মলক্ষণং সোদাহরণং নিরূপনীয়ম্।

২০) বিধিপ্রকারাণাং নামানি লিখতু।

২১) ষট্ প্রমাণানি কানি?

২২) প্রতিপত্তিত্রয়ানাং নামানি কানি?

**২) অত্র সপ্ত প্রশ্নাঃ সন্তি। সংক্ষেপেণ এষু কেবলং ষট্ প্রশ্নাঃ সমাধেয়াঃ।** **৬×৫ = ৩০**

১) ধর্মস্য চতুঃ প্রমাণানি কানি? শ্রুতিস্মৃতয়োঃ বিরোধে কিং গ্রহণীয়ম্? শ্রুতিদ্বৈধে উভয়মেব প্রমাণম্-ব্যাখ্যায়তাম্।

২) অর্থসংগ্রহ-বিষয়কঃ নব-বার্তাঃ সংক্ষেপেণ লিখন্তু।

৩) কর্তব্যবিমুখ-নৃপস্য দোষ-কথন-বিষয়ে মনুনা কিং বর্ণিতম্?

৪) ন্যায্য-ধন-গ্রহণস্য প্রশংসা- বিষয়কঃ মনুনা কিং বর্ণিতম্?

৫) দায়ভাগতঃ শব্দার্থঃ নিরূপয়তু- "জীবন্নেব বা প্রবিভজ্য বনমাশ্রয়েৎ বৃদ্ধাশ্রমং বা গচ্ছেৎ অল্পেন বা প্রবিভজ্য ভূয়িষ্ঠমাদায় বসেৎ যদ্যুপদশ্যেৎ পুনস্তেভ্যো গৃহ্ণীয়াৎ।পিতা চেৎ পুত্রান্ বিভজেৎ তস্য স্বেচ্ছা স্বয়মুপাত্তে অর্থে পৈতামহে তু পিতাপুত্রয়োস্তুল্যং স্বামিত্বাৎ।।

৬) উদ্বাহতত্ত্বানুসারেণ দৈব-আর্ষ্য-কায়/প্রাজাপত্য- বিবাহ-বিষয়কসংজ্ঞাং লিখতু।

৭) বিধিবাক্যং কতিবিধম্? তেষাং নামান্যুদাহরণানি চ লিখন্তাম্।

**গ) অধোলিখিতেষু বিষয়ত্রয়মধিকৃত্য নিবন্ধো লেখনীয়ঃ।** **৩×১০= ৩০**

১) বেদাদিপ্রমেয়ঃ অর্থঃ কতিবিধঃ? তৎ সোদাহরণমুল্লিখ্য কস্মিংশ্চিল্লক্ষ্যে সঙ্গতির্বিধেয়া। যাগহোময়োঃ কো ভেদঃ? কিং নাম স্তোত্রম্, শস্ত্রম্, সাম,স্তোত্রীয়া,স্তোমশ্চ সর্বং দর্শ্যতাম্।

২) গুণকর্ম কতিবিধম্? সলক্ষণমভিধায় "স্বাধ্যায়ঃ অধেতব্যঃ- ইত্যস্য কস্মিন্ কর্মণ্যন্তর্ভাবঃ যুক্ত্যা নিরূপণীয়ঃ।

৩) বিবাহভেদান্ উল্লিখ্যন্তাম্।

৪) গুণত্রয়ম্- ব্যাখ্যায়তাম্।

৫) বর্ণসংকরানুসারেন অনুলোমজা প্রতিলোমজা বা সন্তানানাং নামানি লিখন্তু।